# आर्यमैत्रेय-व्याकरणम्

# ĀRYA MAITREYA-VYĀKARAṆAM

EDITED WITH AN INTRODUCTION

*By*

SRI PRABHAS CHANDRA MAJUMDER

M. A., Sutta-visārada,

*Lecturer, Departments of Pali and Ancient Indian History & Culture, Calcutta University and Hony. Professor Mahārāja Manindra Chandra College, Calcutta.*

*To be had of—*

FIRMA K. L. MUKHOPADHYAY

6/1A, BNCHARAM AKRUR LANE,

CALCUTTA—12

Published by Protul Ch. Majumder
45, Amherst Row, Calcutta-9.

**Price Rs. 5/-**

UNIVERSITY OF WISCONSIN MADISON LIBRARY

23rd. JUNE 1959

Printed by J. C. Sarkhel, at the Calcutta Oriental Press (Private) Ltd.,
9, Panchanan Ghose Lane, Calcutta-9.

U95035

# PREFACE

The Asiatic Society of Calcutta, in its rich collection, preserves a mutilated manuscript of *Ārya Maitreya Vyākaraṇa* (indicated as Ms. A in the text) which was so long considered to be unique. Sometime ago, my teacher Professor Nalinaksha Dutt very kindly gave me a copy of the Gilgit version of this work (indicated as Ms B in the text) which I had the privilege to utilise fully for the present edition.

I am grateful to Prof. Dutt for his kind encouragement by inclusion of this work in his "Gilgit Manuscripts Series". Without his help, this work could not have been published at all. I acknowledge with thanks the occasional help from Sri Kunja Govinda Goswami, Reader, Calcutta University, for seeing through the proofs of this book. Thanks are also due to the Manager, Calcutta Oriental Press Ltd. for the troubles he took for its publication.

PRABHAS CHANDRA MAJUMDER

University of Calcutta

# INTRODUCTION

The *Maitreya Vyākaraṇa* as edited here exists in manuscript in H. P. Shastri Collection No. 4806 of the Asiatic Society, Calcutta. A manuscript of the work has also been discovered from Gilgit. Unfortunately both these manuscripts are incomplete in the beginning with about 25 verses missing. The Asiatic Society manuscript of the text was written during the 57th year of Gopāladeva of the Pāla dynasty of Bengal. He was probably Gopāla II whose approximate year of accession was 940 A.D.[1] This manuscript has been edited by Sylvain Lévi.[2] The present text, as edited here, is mainly based on the manuscript discovered at Gilgit. The missing portion of the text has been translated from the Tibetan. The Tibetan translation has generally maintained the standard of its characteristic literalness and has been of much help in finding out the readings and renderings.

The work is composed in verse and the metre is *Anuṣṭubha*. The language of the work being Buddhist Sanskrit, the general rules of Sanskrit grammar and Prosody have not always been followed in the composition of the verses. The number of verses is hundred and odd and hence the work may also be called to belong to the *Śataka* type of composition. The style is on the whole very simple and lucid.

The Maitreya lore has come down through a number of Buddhist texts both Pāli and Buddhist Sanskrit. The *Maitreya Vyākaraṇa*, as the text stands as a source of ecclesiastic and iconographic inspiration to the people of the Buddhist countries, was very popular and widely read for a considerable period of time, even beyond the limits of India.[3] There were both the prose and the metrical versions of this text and these were translated several times into Chinese, Tibetan and other languages of the Central Asia. Dharma-

1 *History of Bengal* (Dacca Uni.), vol I, p. 179,

2 *Maitreya Le Consolateur*, Études d'orientalisme, published by Musée Guimet in memory of Raymonde Linossier, 1932, p. 355 f.

3 Winternitz, *Hist. Indian Literature*, II, p. 273.

rakṣa (265-316 A.D.) translated the work into Chinese and Kumārajīva and I-tsing translated the work again.[1] The Tibetan translation of this work was done by Jinamitra with the assistance of Lotsava Bandhe Dpal brcegs rakṣita and is preserved in Kanjur, mDo 28. Fragments of this work have also been found in Central Asia in Tokharian and Uigurian languages with the title "*Maitreya-Samiti*"[2] ('the Meeting with Maitreya'). Its author was, according to these fragments, the Vaibhāṣika teacher Āryacandra, There is also a work called *Maitreya-samiti-nāṭaka* and it seems that the text was dramatised and was adapted to dramatic performances on religious occasions[3].

Maitreya Vyākaraṇa, "Prophetic story of the future Buddha, Maitreya" belongs to that period of Buddhist literature which forms a transition from Sthaviravāda to Mahāyāna. *Vyākaraṇa*, in Buddhist Sanskrit, means prophecy or prediction regarding the future Buddhas, the Pratyeka-buddhas or the Śrāvakas. In Pāli, *Veyyākaraṇa* (Skt. Vyākaraṇa) signifies a particular type of composition to be found among the *navaṅga* division of the *Buddhavacana*. In the *Jātakas*, *veyyākaraṇa* offers a canonical exposition of the *gāthā* portion while some of the *suttas* of the *Majjhima Nikāya* may be said to belong to the *veyyākaraṇa* type of composition, since they stand out as a typical commentary on the *gāthās*, embedded in the text itself.[4] According to Buddhaghosa, *Veyyākaraṇa* includes the whole of the Abhidhamma Piṭaka and the Suttas not composed in verses.[5] According to the Mahāyānic conception, however, *Vyākaraṇa* (Pāli, Veyyākaraṇa), signifies a special type of Avadāna-literature which relates in general to the future Buddhahood of a being or a deity or a chief-disciple (mahā-śrāvaka) in a particular world (lokadhātu). As

1 Nanjio, *Catalogue of Chinese Tripiṭaka*, Nos. 205, 207, 208 & 209.

2 E. Leumann has edited the Tokharian versions of this work with its German translation along with the different Chinese versions translated into German by K, Watanabe under the title of *Maitreya Samiti* (Strassburg, 1919).

3 Winternitz, II, p. 273; Bagchi, *India & Central Asia*, p. 107.

4 E. g. *Majjhima Nikāya*, Nos, 131, 133, 136 etc.

5 Malalasekera. *Dictionary of Pāli Proper Names*, p 928.



for example, in the *Ajitasena-Vyākaraṇa*,[1] the Blessed One predicts that after countless ages, king Ajitasena will become a Tathāgata named Ajitapralokanātha, and Nandimitra Mahāśrāvaka, the spiritual guide of king Ajitasena, will become Tathāgata Nandiprabha. Similarly, *Śrī-Mahādevī-Vyākaraṇa*[2] is a prophetic utterance, made by the Blessed One regarding the appearance of the goddess of luck Śrī-Mahādevī as a Tathāgata in one of her future existences; and in *Ārya-Bhadra-Māyākāra-Vyākaraṇa*,[3] the Blessed One predicts that the noble youth Bhadra will appear as Tathāgata Vikurvāṇarāja, after 92,000 aeons, during which time the world will become very rich, extensive, delightful, pleasant, full of men and numerous beings, resounding with various musical sounds etc. Some of the sections of the Mahāyāna sūtras like *Samādhirāja*, *Saddharmapuṇḍarīka* and *Gaṇḍavyūha* may be classed under the *vyākaraṇa* type of composition. The sixth and the ninth sections of the *Saddharmapuṇḍarīka* are called *Vyākaraṇa-parivarta* and the eighth one is called *Pañcabhikṣuśata-vyākaraṇa-parivarta*. The story of Sudhana as told in the *Gaṇḍavyūha* also belongs to the same type.[4]

Maitreya (Pāli, Metteyya) appears to be a *gotra* or family name. Like Gautama, Maitreya means a descendent of Mitrāyu, which may be a patronymic name; but subsequently Maitreya Buddha was applied to Future Buddha and it came to mean the Buddha of Love (*maitrī*). Maitreya's personal name, as given in some texts, was Ajita (Unconquered), as Gautama's personal name was Siddhārtha. Maitreya has been acknowledged by the Sthaviravādins as the principal Bodhisattva. In the *Dharmasaṃgraha*,[5] he is mentioned as the first and in the *Mahāvyutpatti*[6] as the second in the list of Bodhisattvas, playing an important role in the propagation of Mahāyāna. The Pāli scriptures also mention Maitreya, as the next Buddha who will make a number of converts and it is quite natural that the people will aspire

1 Dutt, *Gilgit MSS*. Vol. I, p. 73 ff.

2 *Ibid*. pp. 71f, 93f.

3 Ed. by K Régamey (Tibetan text & Eng. Translation), Warsaw, 1938.

4 Dutt, *Gilgit MSS*. Vol. I, p 71; *Aspects of Mahāyāna Buddhism*, p 9.

5 *Dharmasaṃgraha*. xii

6 *Mahāvyutpatti*, 23

to be reborn in the Maitreya-loka. Maitreya is, thus, worshipped by all the Buddhists and besides Gautama, he is the only future Buddha who finds a respectful place in all the schools of Buddhism. In China, there appeared a sect called the Maitreya which originated mainly from the study of the significant prophetic utterance of the Śākya-muni.

As for the Maitreya-worship prevailing in Jambudvīpa, his image was very common in Northern India as it was noticed by the Chinese pilgrims. Both Fa-Hien and Hiuen-Tsang refer to the colossal image of Maitreya, 80 cubits in height from which emitted a bright ray of light.[1] Another Maitreya figure of sandal wood was also of the same height and the one at Bodhgayā was made entirely of silver. In this connection, it may be stated that both the standing and seated figures of Maitreya have been found in India, the former being more common, while in case of the latter, the legs hang down as seated on chair. In standing figures, the robe is often drawn up to keep the left leg bare. His emblems are the water-flasks and rosary, both of which rest on lotus, held in hands. The seated figure usually assumes the attitude (*mudrā*) of *Dharmacakra*, in which the hands are raised to the breast with fingers touching. Maitreya's image is also found in conventional Buddha-form. In Tibet, Maitreya is depicted on a lotus seat and his images are usually very large in size. In the temples and halls of the monasteries of all Buddhist countries, the arrangement of the images is the same. The image of Gautama is placed in the centre behind the great altar, and on either side are placed the figures of Maitreya and Avalokiteśvara,

The cult of Maitreya appears to have originated earlier to that of Avalokiteśvara and by the time the *Mahāvyutpatti* and other works in Chinese were written, Maitreya seems to have gained significant position. The belief in Maitreya, the future Buddha is indeed very old and can be traced as early as the date when the Dīgha Nikāya was compiled. The *Cakkavattī Sīhanāda Sutta* contains the story of the Metteyya Buddha and records the prophecy, put into the mouth

1 *Si-yu-ki*, tr. by Beal, Vol. I. pp. xxix, 134; also Watters, Yuan Chwang, Vol. I, p. 239 & Vol. II, p. 116.



of the Buddha, that Metteyya would have thousands of followers whereas the Buddha himself had only hundreds. The *Milindapañha*[1] also refers to Metteyya and his virtues. The tradition of Maitreya had become deep rooted by the time when the *Mahāvastu*[2] was compiled and much detail is given in this text about Maitreya. The *Divyāvadāna*[3] also records in the same strain the advent of Maitreya, the Future Buddha: "Now when Maitreya will be the Tathāgata, the royal capital will be named Ketumatī. It will be twelve yojanas long and seven wide. It will be surrounded by seven walls of gold, and encircled by seven rows of palm trees, bright and beautiful and made of the seven precious substances." It refers to the Four Great Treasurers, viz Elapatra in Gandhāra, Pāṇḍuka in Mithilā, Piṅgala in Kaliṅga and Śaṅkha in Vārāṇasī. When Maitreya comes as Buddha, the four great natural treasures of valuables will be in existence.[4] The *Anāgatavaṃsa*[5] or 'Narrative of the Coming Events', a Pāli post-canonical work written in verse and of unknown date relates also an account of the Buddha Metteyya and his blissful abode which agrees in general with the account of the *Maitreya Vyākaraṇa*. The *Anāgatavaṃsa* is composed in 142 verses and according to the *Gandhavaṃsa* it was written by Kassapa, a poet of Coḷa-raṭṭha.[6] A commentary on the *Anāgatavaṃsa* was written by Upatissa.[7] The *Anāgatavaṃsa* which may be called a sequel to the *Buddhavaṃsa* opens the text in the same manner as the *Maitreya Vyākaraṇa* does. It elaborately describes the paradise of Metteyya and his contemporary Cakkavatti-ruler Saṅkha in beautiful ornate Pāli:

> Tadā Ketumatī nāma rājadhānī bhavissati
> dvādasa-yojanāyāmā satta-yojanavitthatā.
>
> Ākiṇṇā naranārīhi pāsādehi vicittitā
> sevitā suddhasattehi ajeyyā dhammarakkhitā.

1 Trenckner, *Milindapañha*, p. 159.
2 *Mahāvastu*, Vol. III, p 240 f.
3 *Divyāvadāna*, ch. III, p 55f.
4 *Ibid*, p, 61.
5 *J. P. T. S.*, 1886, p, 33f.
6 *J. P. T. S.*, 1886, p, 61.
7 Geiger, *Dīpavaṃsa and Mahāvaṃsa*, p. 88.

Saṅkho nāmāsi so rājā anantabalavāhano
sattaratanasampanno cakkavattī mahābalo.
Iddhimā yasavā ceva sabbakāmasamappito
hatapaccatthikaṃ khemaṃ anusāsissati dhammato.

Among the future prophecies made by the Buddha in the *Anāgata-vaṃsa,* was also the one which related to the fate of the religion in future times. Buddha remarked that after his own demise there would occur the five *Disappearances* (antaradhānam) and the relics would fail to receive honour and worship from the people.[1]

The story as given in the text runs thus :

The Blessed One, being requested by Śāriputra to tell something about the future advent of the Maitreya Buddha, narrates that Jambudvīpa with a dimension of 10,000 miles in future times, will become well populated. It will become rich in food and ornaments and the people will live for 80,000 years and the girls will attain marriageable age at 500 years. The present city of Benares will at that time be named Ketumatī and its inhabitants will become indeed blessed. A Cakravartin named Śaṅkha will rule there righteously with fourfold army. The noble king will be possessed of all 'the four great treasure-stores' (*catur-mahā-nidhi*) hidden in different lands: one in Kaliṅga of *Piṅgala,* one in Mithilā of *Pāṇḍuka,* one in Gandhāra of *Elapatra* and the one in the city of Vārāṇasī of *Śaṅkha.* The cakravartī-ruler Śaṅkha will have a chaplain (*purohita*) Subrahman by name who will become well-versed in all the branches of learning. This Brahmin Subrahman will have a son named Maitreya by his wife Brahmāvatī. The text then gives an account of the birth of Maitreya which is described in the same manner as that of Siddhārtha. Then follows a description of all the qualities and virtues of Maitreya who, as the text narrates, will be possessed with thirtytwo distinctive marks of a great man and whose complexion will be golden emitting lustre and eyes similar to the petals of the blue lotus.

At that time, king Śaṅkha will put up a bejewelled sacrificial post

1 *J. P. T. S,* 1886, p. 52.



(*ratnamayaṃ yūpaṃ*) and offer the same to the Brahmins, but the post will break into pieces instantly. Having noticed this incident, Maitreya will come to think about the transitoriness of the world and the sufferings of beings due to transmigration. He will then renounce the world together with eightyfour thousand Brahmins, and will attain supreme knowledge at the foot of the Bodhi-tree called Nāgapuṣpa. Maitreya, after having attained Buddhahood, will turn the wheel of law before a large assembly. In the three great religious convocations which Maitreya himself will convoke, he will preach his teachings with great effect for the good of living beings. In these gatherings, according to the prediction, Maitreya Buddha will receive in his Saṅgha 282 koṭis of converts altogether. Afterwards, king Śaṅkha with a large number of followers, with the father of Maitreya, Brahmin Subrahman, and with other prominent persons of the kingdom, will come to Maitreya Buddha and become his followers. In like manner, the householder Sudhana accompanied by thousands of persons and Viśākhā, the jewel of womanhood of the kingdom of Śaṅkha along with eightyfour thousand women will take renunciation. Maitreya will then preach to them the Noble Truths on three occasions and purify innumerable beings. The gods, Nāgas, Gandharvas and other heavenly deities will also become pleased and follow the teachings of Maitreya. Finally, the Blessed One remarks that the life of Maitreya will last for sixty thousand years and his teaching for ten thousand years more after his *Parinirvāṇa.*

P. C. Majumder

# आर्यमैत्रेय-व्याकरणम्

དཔུང་གི་ཡན་ལག་བཞི་འགྱུར་ཅིང
རིན་ཆེན་བདུན་དང་ཡང་དག་ལྡན། །
རྒྱལ་པོ་དེའི་སྲས་རྣམས་ནི
སྟོང་དུ་ཚང་བར་འབྱུང་བར་འགྱུར ༎༢༢
མི་ཡི་དབང་པོ་དེ་ཡང་ནི
ས་འདི་རྒྱ་མཚོའི་མཐའ་ཀླས་པར། །
ཆད་པ་མེད་ཅིང་ཆོས་དང་ནི
འཐུན་པས་ཡོངས་སུ་སྐྱོང་བར་འགྱུར ༎༢༣
དེ་ཚེ་དུང་ཞེས་བྱ་བ་ཡི
ས་བདག་རྒྱལ་པོ་དེ་ལ་ནི། །
རིན་ཆེན་ཁྲག་ཁྲིག་བརྒྱས་མཚོན་པའི
གཏེར་ཆེན་བཞི་ནི་འབྱུང་བར་འགྱུར ༎༢༤
སྲུའི་མཚན་ནི་སེར་སྐྱ་སྟེ
བཙོམ་བརླག་ན་ནི་དཀར་པོ་ཡིན། །

सप्तरत्नसमन्वितश्चतुरङ्गबलाधिपः ।
सहस्रं हि जनिष्यन्ते पुत्रास्तदास्य भूपतेः ॥२२॥
पृथिवीं सागरान्ताञ्च स परिपालयिष्यति ।
यथाधर्ममदण्डेण नराधिपो हि तद्यथा ॥२३॥
चतुर्महानिधिस्तदा शङ्खाख्यस्य च भूपतेः ।
रत्नानां शतकोटीनां राज्ञस्तदा हि लोक्यते ॥२४॥



पिङ्गलश्च कलिङ्गेषु मिथिलायाम् च पाण्डु[1][कः ।
एलपत्रश्च गान्धारे शंखो वाराणसीपुरे ॥२५॥

चतुर्भिरेभिनिधिभिस्स राजा सुसमन्वितः ।
भविष्यति महावीरः शतपुण्यबलोदितः[2] ॥२६॥

ब्राह्मणस्तस्य राज्ञाश्च सुब्रह्मणः पुरोहितः ।
बहुश्रुतश्चतुर्वेदस्तस्योपाध्यायो भविष्यति ॥२७॥

अध्यापको मन्त्रधरः स्मृतिमान् वेदपारगः ।
कैटभे सनिघंण्टे च पदव्याकरणे तथा ॥२८॥

तदा ब्रह्मावती नाम तस्य भार्या भविष्यति ।
दर्शनीया प्रासादिका अभिरूपा यशस्विनी ॥२९॥

तुषितेभ्यश्चयवित्वा तु मैत्रेयो ह्यग्रपुद्गलः ।
तस्याः कुक्षौ स नियतं प्रतिसन्धिं ग्रहीष्यति ॥३०॥

दशमासांश्च] [3]निखिलां धारयित्वा महाद्यूतिं ।
सुपुष्पितेस्मिन्नुद्याने[4] मैत्रेयजननी ततः ॥३१॥

1 A begins from here.
2 A स्थलोदित ; Tib. སྟོབས་ལས་སྐྱེས
3 B begins from निखिलां ।
4 A सुपुष्पितेवदुद्यानं गत्वा मैत्रेय मातरं ।

न निषण्णा निपन्ना वा[1] स्थिता सा धर्मचारिणी ।
द्रुमस्य शाखामालम्ब्य मैत्रेयं जनयिष्यति ॥३२॥

[निष्क्रमिष्यति पार्श्वेन दक्षिणेन नरोत्तमः ।
अभ्रकूटाद्यथा सूर्यो निर्गतश्च प्रभाव्यते ॥३२॥[2]]

अलिप्तो गर्भपङ्केन कुशेशयमिवाम्बुना[3] ।
त्रैधातुकमिदं सर्वं प्रभया पूरयिष्यति ॥३३॥

प्रीतोऽथ तं सहस्राक्षो देवराजा शचीपतिः ।
जायमानं ग्रहीता स मैत्रेयं द्विपदोत्तमम्[4] ॥३४॥

1 A न निषण्णानिसण्णा सांस्थिता etc.

2 B omits this verse. Tib. agrees with A:

མི་ཡི་མཆོག་ཏུ་གྱུར་པ་དེ། །
གློ་གཡས་ནས་ནི་འབྱུང་འགྱུར་ཏེ། །
དཔེར་ན་སྤྲིན་གྱི་ཕུང་པོ་ནས། །
ཉི་མ་བྱུང་བ་བཞིན་དུ་གསལ། །

3 A पद्मं चैव यथाम्बुणां । Tib. ཇི་ལྟར་ཆུ་ཡི་པདྨ་བཞིན་ །

4 A ग्रहेष्यति कुमारं तं जायमानं नरोत्तमं ; B जायमान गृहीता स मैत्रयं द्विपदोत्तमम् । Tib :

བྱམས་པ་རྐང་གཉིས་མཆོག་གྱུར་པ། །
བལྟམས་པའི་ཚེ་ན་ལེན་པར་འགྱུར། །



पदानि जातमात्रश्च[1] सप्तासौ प्रक्रमिष्यति ।
पदे पदे निधानञ्च पद्मं पद्मं भविष्यति ॥३५॥[2]
दिशश्चतस्रश्चोद्वीक्ष्य वाचं प्रव्याहरिष्यति ।
इयं मे पश्चिमा जाति नास्ति भूयः पुनर्भवः ॥
न पुनरभ्या[3]गमिष्यामि निर्वास्यामि निरास्रवः ॥३६॥
संसारार्णवमग्नानां सत्त्वानां दुःखभागिनां ।
तृष्णाबन्धनबद्धानां करिष्यामि विमोचनम् ॥३७॥[4]
श्वेतं चास्य सुराश्छत्रं धारयिष्यन्ति मूर्धनि ।
शीतोष्णवारिधाराभ्यां नागेन्द्रौ स्नापयिष्यतः ॥३८॥[5]

1 B जातमातुश्च Tib: དེ་ནི་བལྟམས་མ་ཐག་ཏུ་ཡང་ །

2 A adds श्रिया ज्वलन्त मैत्रेय द्वात्रिंशद्वरलक्षणं
मुञ्चमुञ्च सहस्राक्षैर्जातमात्रो वदिष्यति ।
Tib. follows B.

3 A पुनरागमिष्यामि ; Tib: ཡང་དང་ཡང་དུ་སྐྱེ་མི་འོང་ །

4 This verse occurs in B only, Tib. & A omit this verse.

5 A reads शीतोष्ण वारिधाराभिः स्नापयिष्यन्ति पन्नगाः
दिव्याम्बराणि पुष्पाणि पतिष्यन्ति नभतस्तलात् ।
श्वेतं तस्य सुराश्छत्रं धारयिष्यन्ति मूर्धनि ।

Tib. agrees with A :

ཀླུ་རྣམས་ཀྱིས་ནི་ཆུ་ཡི་རྒྱུན། བསིལ་དང་འཇམ་པས་སྐུ་བསིལ་འགྱུར། །
ནམ་མཁའི་ངོས་ནས་ལྷ་རྫས་ཀྱི། གོས་དང་མེ་ཏོག་འབབ་པར་འགྱུར། །
དེའི་དབུ་ལ་གདུགས་དཀར་པོ། ལྷ་རྣམས་ཀྱིས་ནི་འཛིན་པར་འགྱུར། །

प्रतिगृह्य च तं धात्री द्वात्रिंशद्वरलक्षणम् ।
श्रिया ज्वलन्तं मैत्रेयं मात्रे समुपनेष्यति ॥३९॥[1]
मनोरमां च शिविकां नानारत्नविभूषितां ।
आरूढां पुत्रसहितां वहिष्यन्ति च देवता ॥४०॥
ततस्तूर्यसहस्रेषु वाद्यमानेषु तत्पुरं ।
प्रविष्टमात्रे मैत्रेये पुष्पवर्षं पतिष्यति ॥४१॥[2]
दृष्ट्वैवं पुत्रं सुब्रह्मा द्वात्रिंशद्वरलक्षणम् ।
प्रत्यवीक्षाथ[3] मन्त्रेषु तदा[4] प्रीतो भविष्यति ॥४२॥
गतिद्वयं कुमारस्य यथा मन्त्रेषु दृश्यते ।
नराधिपश्चक्रवर्त्ती बुद्धो वा द्विपदोत्तमः ॥४३॥

1 B agrees with Tib. but differs slightly from A.

Tib: མཚན་མཆོག་སུམ་ཅུ་གཉིས་མངའ་བ
བྱམས་པ་དཔལ་གྱིས་འབར་བ་དེ །
མ་མས་ཡང་དག་བླངས་ནས་སུ
ཡུམ་གྱི་ཕྱག་ཏུ་འབུལ་བར་འགྱུར ॥

A हृष्टश्चैव सहस्राक्षो देवराजो शचीपतिः
ग्रहीष्यति तत्कुमारं द्वात्रिंशद्वरलक्षणं ।
श्रिया ज्वलन्तं मैत्रेयं मातुर्हस्ते प्रदास्यति ।

2 A तस्मिंश्च दिवसे नार्याङ्कुर्विण्यः प्रसविष्यन्ति ।
सर्वास्ताः जनयिष्यन्ति पुत्रान् क्षेमेन स्वस्तिना ॥

3 A प्रत्यवेक्ष्य च मन्त्रेषु 4 A ततः



स च यौवनसंप्राप्तो मैत्रेयः पुरुषोत्तमः[1] ।
चिन्तयिष्यति धर्मात्मा दुःखिता खल्वियं प्रजाः ॥४४॥

ब्रह्मस्वरो महाघोषो[2] हेमवर्णो महाद्युतिः ।
विशालवक्षः पीनांसः[3] पद्मपत्रनिभेक्षणः ॥४५॥

हस्तः पञ्चाशदुच्छ्राय तस्य कायो भविष्यति ।
विस्तृतश्च ततोऽर्द्धेण शुभवर्णसमुच्छ्रयः ॥४६॥[4]

अशीतिभिश्चतुर्भिश्च सहस्रैः संपुरस्कृतः ।
मानवानां[5] स मैत्रेयो मन्त्रानध्यापयिष्यति ॥४७॥

1 A मैत्रेयो ह्यग्रपुद्गलः । Tib བྱམས་པ་རྐང་གཉིས་མཆོག་གྱུར་པ lit. means मैत्रेयः द्विपदोत्तमः ।

2 A महादीप्तोः ; Tib དབྱངས་ཆེ महाघोषो

3 A पीणांगो ; Tib ཐལ་གོང་རྒྱས पीणांसः

4 A समुच्छ्रयेण हस्ताशीतिस्तस्य कायो भविष्यति ।
विस्तारं विंशहस्तानि ततोऽर्द्धं मुखमण्डलं ॥

Tib: དེ་ཡི་སྐུ་ཡི་ཁྲུན་དུ་ནི། ཁྲུ་ནི་བརྒྱད་ཅུ་དག་ཏུ་འགྱུར ॥
ཞེང་ནི་ཁྲུ་རྣམས་ཉི་ཤུ་སྟེ । ཞལ་གྱི་དཀྱིལ་འཁོར་དེ་ཡི་ཕྱེད ॥

5 A मानवानाञ्च ; Tib: བྲམ་ཟེའི་བུ

अथ[1] शंखो नरपतिः[2] यूपमुच्छ्रापयिष्यति ।
तिर्यञ्च षोडश-व्यामं ऊर्द्ध्वं व्यामसहस्रकम्[3] ॥४८॥

स तं यूपं नरपतिर्नानारत्नविभूषितं ।
प्रदास्यति द्विजातिभ्यो यज्ञं कृत्वा पुरःसरं ॥४९॥[4]

तञ्च रत्नमयं यूपं दत्तमात्रं मनोरमं ।
ब्राह्मणाणां सहस्राणि विकिरिष्यन्ति तत्क्षणात् ॥५०॥[5]

[[6]यूपस्य] तस्य मैत्रेयो दृष्ट्वा चैतामनित्यतां ।
कृतस्नं विचिन्त्य संसारं प्रव्रज्यां रोचयिष्यति ॥५१॥

1 A ततः 2 A महाराजा ; Tib རྒྱལ་པོ་ཆེན་པོ་དུང

3 A षोडशव्याम विस्तारं ऊर्द्ध्वं व्यामसहस्रकं ।
Tib སྲོམ་སུ་འདོམ་ནི་དྲུག་ཅུ་བཞི། འཕང་དུ་འདོམ་ནི་སྟོང་ཡོད་པའི ‖

4 Tib མི་དབང་དེ་ཡིས་མཆོད་སྡོང་དེ །
རིན་ཆེན་སྣ་ཚོགས་ཀྱིས་བརྒྱན་ནས ‖
མཆོད་སྦྱིན་གྱིས་ནི་མདུན་དྲངས་ཏེ །
བྲམ་ཟེ་དག་ལ་རབ་ཏུ་འབུལ ‖

5 A adds before this verse: सप्तरत्नमयं यूपं ब्राह्मणेभ्यः प्रदासति (प्रदास्यति) ; Tib. and B omit this line.

6 A तस्य यूपस्य



यत्वहं[1] प्रव्रजित्वेह स्पृशेयममृतं पदं ।
विमोचयेयं जनतां व्याधिमृत्युजराभयात् ॥५२॥[2]
अशीतिभिः सहस्रैस्स चतुर्भिश्च पुरस्कृतः ।
निष्क्रमिष्यति मैत्रेयः प्रव्रज्यामग्रपुद्गलः ॥५३॥[3]

1 A यत्वाऽहं

2 After this verse Tib. adds
སྐྱེ་བོ་རབ་དང་གཟིགས་ནས་ནི །
སྡུག་བསྔལ་སྡུག་བསྔལ་ཀུན་འབྱུང་དང ‖
སྡུག་བསྔལ་ཡང་དག་འོང་བ་དང །
བདེ་བ་མྱ་ངན་ལས་འདས་འགྲོ ‖
འཕགས་ལམ་ཡན་ལག་བརྒྱད་པ་ཡི །
བདེན་པ་དག་ཀྱང་སྟོན་པར་འགྱུར ‖
དེ་ཡི་ཆོས་དེ་ཐོས་ནས་ཀྱང །
བསྟན་པ་ལ་ནི་ནན་ཏན་བསྒྲུབ ‖

In A & B these verses occur later on as verses 58 & 59.

3 A अशीतिभिश्चतुर्भिश्च सहस्रैः संपुरस्कृतः ।
नराधिपो निष्क्रमिष्यति मैत्रेय प्रव्रज्यामग्रपुद्गलः ॥
B and Tib. omit नराधिप before निष्क्रमिष्यति which is evidently a scribe's mistake. Tib:
བྱམས་པ་གང་ཟག་མཆོག་གྱུར་ཏེ ། སྟོང་ཕྲག་བཞི་པོ་དག་དང་ནི ‖
བརྒྱད་ཅུ་དག་གིས་མདུན་འདོར་ནས ། རབ་ཏུ་འབྱུང་བར་ངེས་འབྱུང་འགྱུར ‖

नागवृक्षस्तदा तस्य बोधिवृक्षो भविष्यति ।
पञ्चाशद्योजनान्यस्य शाखा ऊर्द्ध्वं समुच्छ्रिताः[1] ॥५४॥
निषद्य तस्य चाधस्तान्मैत्रेयः पुरुषोत्तमः ।
अनुत्तरां शिवां बोधिं समवाप्स्यति नायकः ॥५५॥[2]
यस्यामेव च रात्रौ स प्रव्रज्यां निष्क्रमिष्यति ।
तस्यां एव च रात्रौ हि परां बोधिमवाप्स्यति ॥५६॥[3]

1 A ऊर्द्ध्वशाखा समुद्गताः । Tib:

དེའི་ཡལ་ག་ནམ་འཕང་དུ། །
དཔག་ཚད་ཙམ་དུ་ཡང་དག་འཕགས ॥

2 A सक्रोश (षट्क्रोश) विटपान्यनि (०न्यस्य) वित्रतानि समन्ततः ।
तस्य मूले निषण्णासौ मैत्रेयो द्विपदोत्तमः ।
अनुत्तराञ्च सम्बोधिं प्राप्स्यते नात्र संशयः ॥

Tib: དེ་ནི་བྱང་ཆུབ་ཤིང་དེ་ཡི། །
ཡལ་ག་གེལ་པ་ཐམས་ཅད་དུ ॥
ཀོར་ཀོར་ཡུག་རྒྱང་གྲགས་དྲུག །
ཁེབས་པ་ཁོ་ན་དག་ཏུ་འགྱུར ॥
བྱམས་པ་རྐང་གཉིས་མཆོག་གྱུར་དེ ।
དེ་ཡི་དྲུང་དུ་གཤེགས་ནས་སུ ॥
བླ་མེད་བྱང་ཆུབ་ཞི་བ་ནི ।
ཐོབ་འགྱུར་འདི་ལ་ཐེ་ཚོམ་མེད ॥

3 A omits this verse. Tib. agrees with B.



अष्टाङ्गोपेतया वाचा ततः स पुरुषोत्तमः[1] ।
देशयिष्यति सद्धर्मं[2] सर्वदुःखापहं शिवम् ॥५७॥
प्रसन्नां जनतां दृष्ट्वा सत्यानि कथयिष्यति ।
दुःखं दुःखसमुत्पादं दुःखस्य समतिक्रमं ॥५८॥[3]
आर्यं चाष्टाङ्गिकं मार्गं क्षेमं निर्वाणगामिनं ।
तं चापि धर्मं संश्रुत्य प्रतिपत्स्यन्ति शासने ॥५९॥[4]
उद्याने पुष्पसंच्छन्ने[5] सन्निपातो भविष्यति ।
पूर्णं च योजनशतं पर्षत्तस्य भविष्यति ॥६०॥
श्रुत्वा नरपति राजा शङ्खो नाम महायशाः ।
दत्वा दानमसंख्येयं प्रव्रज्यां निष्क्रमिष्यति ॥६१॥[6]

1 A मुनिसत्तमः, Tib. ཐུབ་མཆོག

2 A स धर्मः

3 A दुःखं दुःखसमुत्पादं दुःखस्य समतिक्रमं । आर्यञ्चाष्टाङ्गिकं मागत्तेमं निर्वान-गामिनं ॥ प्रसन्नां जनतां दृष्ट्वा सत्यानि कथयिस्यति । तञ्चास्य धर्म (धर्मं) संश्रुत्य प्रतिपद्यन्ति शासने ॥

4 Verses 58-59 occur in Tib. after verse 52.

5 A सुपुष्पितेव उद्याने । Tib. མེ་ཏོག་མཛེས་པ་རྒྱས་པ་ཡི །
བསྐྱེད་མོས་ཚལ་དུ etc.

6 A ततः श्रुत्वा नरपति शंखो राजा महायशाः ।
दत्वा दानमसंख्येयं प्रव्रज्यां रोचयिष्यति ॥

Tib. agrees with A དེ་ནས་མི་དབང་རྒྱལ་པོ་དུང་ । གྲགས་པ་ཆེན་པོས་ཐོས་ནས་ནི ॥ སྦྱིན་པ་གྲངས་མེད་བྱས་ནས་ཀྱང་ । རབ་ཏུ་འབྱུང་བར་འདོད་པར་འགྱུར ॥

अशीतिभिश्चतुर्भिश्च सहस्रैः परिवारितः[1] ।
नराधिपो विनिष्क्रम्य[2] प्रव्रज्यामुपयास्यति ॥६२॥
अनेनैव[3] प्रमाणेन मानवानां पुरस्कृतः ।
मैत्रेयस्य पिता तत्र[4] प्रव्रज्यां निष्क्रमिष्यति[5] ॥६३॥
ततो गृहपतिस्तत्र[6] सुधनो[7] नाम विश्रुतः ।
प्रव्रजिष्यति शुद्धात्मा[8] मैत्रेयस्यानुशासने[9] ॥६४॥
स्त्रीरत्नमथ शङ्खस्य विशाखा नाम विश्रुता ।
अशीतिभिश्चतुर्भिश्च सहस्रैः संपुरष्कृता ॥
नारीणामभिनिष्क्रम्य[10] प्रव्रज्यां रोचयिष्यति[11] ॥६५॥

1 A संपुरष्कृतः ।

2 B निष्क्रम्य । Tib: ཁྱིམ་ནས་ངེས་པར་བྱུང་ནས་ནི (lit. अगारात् निष्क्रम्य) ।

3 A तेनैव Tib: དེ་བཞིན་དུ

4 A चैव Tib: ཀྱང

5 A प्रव्रज्यामुपयास्यति । Tib: རབ་ཏུ་འབྱུང་བར་འགྲོ་བར་འགྱུར །

6 A omits ०स्तत्र Tib: དེ་ཚེ །

7 B सधनो Tib: ནོར་བཟང

8 A धर्मात्मा Tib: ཆོས་ཀྱི་བདག་ཉིད

9 A सहस्रैः परिवारितः । Tib: སྟོང་དག་གིས་བསྐོར་ནས །

10 A नारीणां सह निष्क्रम्य Tib: (བུད་མེད) དེ་ཡི་འོག་ཏུ་མངོན་བྱུང་ནས།

11 A प्रव्रज्यामुपयास्यति । Tib: རབ་ཏུ་འབྱུང་བར་འགྲོ་བར་འགྱུར །



प्राणिनः तत्र समये सहस्राणि शतानि च ।
प्रव्रज्यामुपयास्यन्ति मैत्रेयस्यानुशासने ॥६६॥
[ सुपुष्पितेऽस्मिन्नुद्याने सन्निपातो भविष्यति ।
समन्ततो योजनशतं पर्षत् तस्य भविष्यति ॥६७॥ ][1]
ततः कारुणिकः शास्ता मैत्रेयः पुरुषोत्तमः[2] ।
समितिं व्यवलोक्याथ इममर्थं प्रवक्ष्यति[3] ॥६८॥
सर्वे ते शाक्यसिंहेन गुणिश्रेष्ठेन तायिना ।[4]
अर्थतो लोकनाथेन दृष्ट्वा सद्धर्मधातुना[5] ।
रोपिता मोक्षमार्गेण विक्षिप्ता मम शासने[6] ॥६९॥[7]

1 See V. 60.

2 A मैत्रेयो द्विपदोत्तमः ; Tib: བྱམས་པ་རྐང་གཉིས་མཆོག །

3 A इदमर्थं प्रवक्ष्यते ।

4 A सर्वे ते शाक्यमुनिना मुनिश्रेष्ठेण तायिणा ।

5 B परीत्ता भूरिमेधसा ।

6 B omits रोपिता...मम शासने ।

7 A agrees with Tib :

ཤཱཀྱ་སེང་གེ་ཐུབ་པ་སྟེ། གཙོ་བོ་སྐྱོབ་པར་མཛད་པ་པོ ॥
དམ་པའི་ཆོས་དབྱིངས་གཟིགས་གྱུར་པ །
འཇིག་རྟེན་མགོན་པོས་འདི་དག་ཀུན ॥
ཐར་པའི་ལམ་དེ་བསྐྱེད་ནས་ཀྱང །
ཏོན་ཀྲུས་ང་ཡི་བསྟན་ལ་བཏང ॥

छत्रध्वजपताकाभिर्गन्धमाल्यविलेपनैः ।
कृत्वा स्तूपेषु सत्कारं[1] आगता हि ममान्तिकम्[2] ॥७०॥
संघे दत्वा च दानानि चीवरं पानभोजनं ।
विविधं ग्लानभैषज्यं आगता हि ममान्तिकम् ॥७१॥[3]
कुंकुमोदकसेकं च चन्दनेनानुलेपनं[4] ।
दत्वा[5] शाक्यमुनेः स्तूपेष्वागता हि ममान्तिकम्[6] ॥७२॥[7]

1 A कृत्वा शाक्यमुनेः पूजा । Tib: ཤཱཀྱ་ཐུབ་པ་ལ་མཆོད་ནས་ནི which agrees with A.

2 A ह्यागता मम शासने । B ममान्तिके । Tib: ང་ཡི་བསྟན་ལ་ལྷགས་པ་ཡིན། agrees with A.

3 A & Tib. have this verse later on, see V. 74, f. n. 1.

4 Tib. ཙན་དན་གྱི་ནི་བྱུག་པ་ཡིས ( चन्दनानुलेपनेन ? )

5 Tib: མཆོད་ནས་ ( पूजित्वा ? )

6 A ह्यागता मम शासने see f. n. 2 above.

7 A & Tib. have the following verse after it.

बुद्धं धर्मञ्च संघञ्च गत्वानुशरणं सदा ।
कृत्वानुकुशलं कर्म ह्यागता मम शासने ॥

Tib: དེ་ཚེ་སངས་རྒྱས་ཆོས་དང་ནི་
དགེ་འདུན་ལ་ཡང་སྐྱབས་སོང་ཞིང་།
དགེ་བའི་ལས་ཀུན་བྱས་ནས་ནི།
ང་ཡི་བསྟན་ལ་ལྷགས་པ་ཡིན།། See also V. 75.



शिक्षापदानि चाधाय शाक्यसिंहस्य शासने ।
परिपाल्य यथाभूतं आगता हि ममान्तिकम् ॥७३॥

उपोषधं उपोष्येह आर्यमष्टाङ्गिकं शुभं ।
चतुर्दशीं पञ्चदशीं पक्षस्येहाष्टमीं तथा ।
प्रातिहारिकपक्षं चाप्यष्टाङ्गं सुसमाहितं ॥७४॥[1]

[शीलानि च समादाय संप्राप्तानि च शासनम् ।
बुद्धं धर्मं च संघं च सत्त्वास्ते शासनं गताः ॥
कृत्वा च कुशलं कर्म मच्छासनमुपागताः ॥७५॥

तेनैते प्रेषिताः सत्त्वा प्रतीष्टाश्च मयाप्यमी ।
गणिश्रेष्ठेण मुनिना परीता भूरिमेधसा ॥७६॥

प्रसन्नां जनतां दृष्ट्वा सत्यानि कथयिष्यति ।
श्रुत्वा च ते ततो धर्मं प्राप्स्यन्ति पदमुत्तमम् ॥७७॥][2]

1 A has the following reading

दत्वा सङ्घे च दानानि चीवरं पानभोजनं ।
विचित्रं ग्लानभैषज्यं ह्यागता मम शासने ॥
चतुर्दशीम्पञ्चदशीं पक्षस्येहाष्टमीं तथा ।
प्रातिहारिक पक्षञ्च अष्टाङ्गं सुसमाहितं ।
उपवासमुपोषित्वा ह्यागता मम शासने ॥

Tib. agrees with A.

2 A & Tib. omit Vv. 75-77.

प्रातिहार्यत्रयेणासौ श्रावकान्विनयिष्यति ।
सर्वेते आस्रवास्तत्र क्षिपयिष्यन्ति सुरताः ॥७८॥

प्रथमः सन्निपातोस्य श्रावकाणां भविष्यति ।
पूर्णाः षण्णवतिकोट्यः श्रावकाणां भवच्छिदां ॥७९॥

द्वितीयः सन्निपातोस्य श्रावकाणां भविष्यति ।
पूर्णाश्चतुर्नवति कोट्यः शान्तानां भूरिमेधसां ॥८०॥[1]

तृतीयः सन्निपातोस्य श्रावकाणां भविष्यति ।
पूर्णाः द्वाविंशति कोट्यः शान्तानां शान्तचेतसां ॥८१॥[2]

धर्मचक्रं प्रवर्त्याथ विनीय सुरमानुषान् ।
साधं श्रावकसंघेण पुरे पिण्डं चरिष्यति ॥८२॥

1 A पुरार्णाश्चतुर्नवतिः कोट्या मुक्तानां क्लेशबन्धनात् ; Tib. agrees with A and it reads: ཉོན་མོངས་འཆིང་བ་ལས་གྲོལ་བའི ། དུང་ཕྱུར་ཕྲག་དགུ་བྲེ་ཕྲག་བཞི ། ཚངས་བའི etc.

2 A पुरार्णा द्वानवतिः कोट्या मुक्तानां शान्तचेतसां ; Tib. སེམས་ཞི་རྣམ་པར་གྲོལ་གྱུར་པ ། དུང་ཕྱུར་ཕྲག་དགུ་བྲེ་ཕྲག་གཉིས ། ཚང་པའི etc. and it agrees with A.



ततः प्रविशतस्तस्यां रम्यां केतुमतीं पुरीं ।[1]
मान्दारकाणि पुष्पाणि पतिष्यन्ति पुरोत्तमे[2] ॥
देवताः प्रकिरिष्यन्ति तस्मिन् पुरगते मुनौ ॥८३॥[3]
चत्वारश्च महाराजा शक्रश्च त्रिदशाधिपः ।
ब्रह्मा देवगणैः साधं पूजां तस्य करिष्यति ॥८४॥
उत्पलं कुमुदं पद्मं पुण्डरीकं सुगन्धिकं ।
अगुरुं चन्दनं चापि[4] दिव्यं माल्यं पतिष्यति[5] ॥८५॥

1 This line occurs in A & Tib. only. B has the following additional portion which is left out in A & Tib:

ततः मुनिशतस्तस्य [—] ह्या कुंकुमकेसरान् ।
ऋद्धिश्चाप्यनुभावश्च महार्थः प्रभविष्यति ॥

2 A नरोत्तमे ; Tib. agrees with B पुरोत्तमे ।

3 Tib. reads this verse as:

དེ་ནས་ཏོག་ལྡན་དགའ་ལྷ་ཡི །
གྲོང་ཁྱེར་དེར་ནི་གཤེགས་པ་ན ॥
གྲོང་ཁྱེར་མཆོག་ཏུ་མན་རའི །
ནྡཱ
མེ་ཏོག་ཆར་ཆེན་འབབ་བར་འགྱུར ॥
ཐུབ་པ་གྲོང་དེར་གཤེགས་པ་ལ །
ལྷ་ཡིས་མེ་ཏོག་འཐོར་བར་འགྱུར ॥

4 A चैव ।

5 A दिव्यमाल्यान्तथैव च । Tib. དེ་བཞིན་ལྷ་རྫས་ཕྲེང་བ་དང །

चैलक्षेपं करिष्यन्ति देवपुत्रा महर्द्धिकाः ।
तं लोकनाथमुद्वीक्षय प्रविशन्तं पुरोत्तमम् ॥८६॥
[ दिव्यश्च तूर्यनिर्घोषो दिव्यं माल्यं पतिष्यति ।
देवता प्रकिरिष्यन्ति तस्मिन् पुरगते मुनौ ॥८७॥
ये तु केतुमतीं केचित् वासयष्यन्ति मानुषाः ।
तेपि तं पूजयिष्यन्ति प्रविशन्तं पुरोत्तमम् ॥८८॥ ][1]
पथि भूम्यास्तरं तत्र मृदुतूलपिचोपमम् ।
विचित्रञ्च शुभं माल्यं विकिरिष्यन्ति ते तदा ॥८९॥[2]
छत्रध्वजपताकाभिरर्चयिष्यन्ति मानुषाः ।
शुभैश्च तूर्यनिर्घोषैः प्रसन्नमनसो नराः ॥९०॥[3]

1 A & Tib. omit Vv. 87 & 88.

2 A याथ भूम्यांस्थिता तत्र मृदुतूलपिचूपमां ।
विचित्रञ्च शुभं माल्यं विकरिष्यन्ति वै पथि ॥
Tib. agrees with B:
ཤིང་བལ་འདབ་ལྟར་འཇམ་པ་ཡི། ས་དར་གདིང་བ་རྒྱ་ཆར་འདིངས ॥
དེ་དག་ལམ་ཀར་ཕྲེང་པ་ཉི། སྣ་ཚོགས་མཛེས་པ་རྣམ་པར་འགྲེམས ॥

3 A reads this verse as follows: छत्रध्वजपताकाभि र्गन्धमाल्यानुलेपनैः ।
शुभैश्च तूर्यनिर्घोषैं प्रसन्नमनसो नराः। शास्तुनः पुजां करिष्यन्ति देवपुत्रा महर्द्धिकाः॥
Tib. agrees with A and reads as follows:
ལྷའི་བུ་ནི་མཐུ་ཆེན་དང་། མི་རྣམས་ཡིད་ནི་རབ་དང་བ ॥
གདུགས་དང་རྒྱལ་མཚན་བ་དན་དང་། སྤོས་དང་ཕྲེང་བ་བྱུག་པ་དང ॥
རོལ་མོ་སྒྲ་སྙན་བསྒྲགས་པ་ཡིས། སྟོན་པ་ལ་ནི་མཆོད་པར་འགྱུར ॥



तं[1] च शक्रः सहस्राक्षो देवराजः शचीपतिः[2] ।
प्रहृष्टः प्राञ्जलिर्भूत्वा[3] मैत्रेयं स्तोष्यते जिनम्[4] ॥९१॥
नमस्ते पुरुषाजन्य नमस्ते पुरुषोत्तम ।
अनुकम्पस्व जनतां भगवन्नग्रपुद्गल ॥९२॥
महर्द्धिको देवपुत्रस्तस्य मारो भविष्यति ।
स चापि प्राञ्जलिर्भूत्वा[5] स्तोष्यते लोकनायकम् ॥ ९३॥
[ शुद्धावास सहस्रैश्च बहुभिः परिवारितः ।
प्रवेक्ष्यते च मैत्रेयो लोकनाथो विनायकः ॥९४॥ ][6]
ब्राह्मण-परिवारेण ब्रह्मा चापि[7] गिरास्फुटम्[8] ।
कथयिष्यति सद्धर्मं ब्राह्मं घोषमुदीरयन् ॥९५॥
आकीर्णा पृथिवी सर्वा अर्हद्भिश्च भविष्यति ।
क्षीणाश्रवै-र्वान्तदोषैः प्रहीणभवबन्धनैः ॥९६॥

1 A स च ।

2 A महाद्युतिः । Tib. agrees with B བདེ་སོགས་བདག་པོ་དེ शचीपति ।

3 A प्राञ्जलिं कृत्वा Tib: ཐལ་མོ་སྦྱར་ནས །

4 A स्तोष्यते लोकनायकं ; Tib. agrees with A: འཇིག་རྟེན་མགོན་ལ་བསྟོད་པར་བྱེད ।

5 A प्राञ्जलीङ्कृता । Tib. agrees with A. དེ་ཡང་ཐལ་མོ་རབ་སྦྱར་ནས ।

6 This verse occurs only in B. Tib. & A omit this verse.

7 A चैव ।

8 A पुरस्कृतः Tib. ཡོངས་བསྐོར་ཅིང and མདུན་བདར་དེ (?)

हृष्टा देवमनुष्याश्च गन्धर्वा यक्षराक्षसाः ।
शास्तुः पूजां करिष्यन्ति नागाश्चापि महर्द्धिकाः ॥९७॥
ते वै नूनं भविष्यन्ति च्यानघाश्छिन्नसंशयाः ।
[ उत्क्षिप्तपरिखाः धीरा अनादाना निरुत्सकाः ॥ ] [1]
ब्रह्मचर्यञ्चरिष्यन्ति मैत्रेयस्यानुशासने ॥९८॥
तेऽपि[2] नूनं भविष्यन्ति अममा अपरिग्रहाः ।
अजातरूपरजता अनिकेता असंस्तवाः ॥
ब्रह्मचर्यञ्चरिष्यन्ति ये मैत्रेयानुशासने ॥९९॥
ते वै पारं गमिष्यन्ति छित्वा जालमेव भुजात् ।[3]
ध्यानानि चोपसंपद्य प्रीतिसौख्यसमन्विताः ।
ब्रह्मचर्यञ्चरिष्यन्ति मैत्रेयस्यानुशासने ॥१००॥

1 Tib. omits this line and A reads: छिन्नस्रोता अनादीना उत्तीर्णार्ण-भवसागराः in place of उत्क्षिप्तपरिखाः···निरुत्सकाः as found in B. Tib. reads this verse as:

གང་དག་བྱམས་པའི་བསྟན་པ་ལ། 
ཚངས་པར་སྤྱོད་པ་སྤྱོད་གྱུར་པ།། 
དེ་དག་གདོན་མ་ཟ་བར་ནི། 
ཉོན་མོངས་མེད་ཅིང་ཐེ་ཚོམ་མེད།།

2 A ते वै ।

3 A ते वै नूनं भविष्यन्ति छिन्नजालविशङ्किकाः । ध्यानानि चोपसंपद्य etc. Tib. agrees with A and reads: སྲིད་པའི་དྲ་བ་གཅད་པ་དང་ etc.



षष्ठिं वर्ष सहस्राणि मैत्रेयो द्विपदोत्तमः ।
देशयिष्यति सद्धर्मं शास्ता लोकानुकम्पया[1] ॥१०१॥
शतानि च सहस्राणि[2] प्राणिणां स विनायकः ।
विनीय धर्मकायेन[3] ततो निर्वाणमेष्यति[4] ॥१०२॥
तस्मिंश्च निर्वृते धीरे मैत्रेये द्विपदोत्तमे ।
दशवर्षसहस्राणि सद्धर्मं स्थास्यति क्षितौ ॥१०३॥[5]
प्रसादयति चित्तानि तस्माच्छाक्यमुनौ जिने ।
ततोद्दक्षथ मैत्रेयं संबुद्धं द्विपदोत्तमम् ॥१०४॥

1 A देशयिष्यति सद्धर्मं सर्वभूतानुकम्पकं ; Tib. agrees with A and reads: འབྱུང་པོ་ཀུན་ལ་ཐུགས་རྗེ་བ ( सर्वभूतानुकम्पकं )

2 A शतलक्षसहस्राणि etc. Tib. དེ་ན་སྲོག་ཆགས་བརྒྱ་སྟོང་དང་། 
འབུམ་ཕྲག་རྣམ་པར་འདྲེན་པ་སྟེ།།

3 A विनयित्वा च सद्धर्मं in place of विनीय धर्मकायेन as read in B. Tib. agrees with A and reads: དམ་པའི་ཆོས་ལ་བཏུལ་ནས་ནི།

4 A reads ततो णमेष्यति and drops निर्वा । Tib. དེ་ནས་མྱ་ངན་འདའ་པར་འགྱུར།།

5 A reads this verse as : परिनिर्वृतस्य [- -] तस्यैव [-] महामुनेः ।
दशवर्षसहस्राणि सद्धर्मं स्थास्यते तदा ॥

Tib. reads :

ཐུབ་པ་ཆེན་པོས་གསུངས་པ་དེ། ཡོངས་སུ་མྱ་ངན་འདས་ནས་ཀྱང་།། 
དེ་ཚེ་དེ་ཡི་དམ་ཆོས་ནི། ལོ་ཁྲི་དག་ཏུ་གནས་པར་འགྱུར།།

[ तस्माद्धर्मे च बुद्धे च संघे चापि गणोत्तमे ।
प्रसादयति चित्तानि भविष्यति महर्द्धिकं ॥१०५॥
तं तादृशं कारुणिकं मैत्रेयं द्विपदोत्तमं ।
आराधयित्वा कालेन ततो निर्वाणमेष्यथ ॥१०६॥ ][1]
इदमाश्चर्यकं श्रुत्वा दृष्ट्वा च विभवानल्पिकां[2] ।
को विद्वान्न प्रसीदेत अपि कृष्णासु जातिषु[3] ॥१०७॥
तस्मादिहात्मकामेन माहात्म्यमभिकांक्षताः[4] ।
सद्धर्मो गुरुकर्त्तव्यः स्मरता बुद्धशासनम् ॥१०८॥

॥ मैत्रेय-व्याकरणं समाप्तं ॥[5]

---

1 Verses 105 & 106 are missing in A.

2 A इमामृद्धिमनुत्तमां । Tib. འབྱོར་པ་མི་ཉུང་མཐོང་མཛད། which may be restored as दृष्ट्वा चानल्पविभव' ।

3 A अभिकृतृष्णाभिजातिकः ; B अपि कृष्णापि जातिषु Tib. ནག་པོའི་རིགས་ཀྱང (अपि कृष्णासु जातिसु ?)

4 A ०मभिकांक्षिनाः ।

5 A adds the following at the end of the text after the usual ये धर्मा हेतुप्रभवा formula : चीनदेशीविनिर्गतः भिक्षु पुण्यकीर्त्ति-र्यदत्र-पुण्यन्त-द्भवत्वाचार्योपाध्याय-मातापितृ-पूर्व्वङ्गमं कृत्वा सकल-सत्वराशेरनुत्तराय ज्ञान-फलाप्तय इति ॥ श्रीमद्गोपालदेव राज्य सम्बत् ५७ फाल्गुण दिने ६ घोषली-ग्रामे लिखति । ॐहारीति महायक्षिणी हर हर मम सर्व पापानि त्वां स्वाहा ॥०॥ हारीतिपिण्डद्वय ॥

# INDEX


अजित ( Personal name of मैत्रेय ) iii
अजितसेन व्याकरण iii
अनागतवंस v, vi
अभिधम्मपिटक ii
अवदान ii
अवलोकितेश्वर iv
अर्हत् २७
आर्यचन्द्र ( वैभाषिक ) ii
आर्याष्टाङ्गिकमार्ग २६
उपवास २३
उपोषध २३
ऋद्धि ३, २६, २७, २८, ३०
एलपत्र v, vi, ११
कलिङ्ग v, vi, ११
कुमारजीव ii
केतुमती v, vi, ७, २५, २६
कैटभ ११
गण्डव्यूह ii
गन्धवंस v
गन्धर्व vii, २८
गान्धार v, vi, ११
गोपालदेव i, ३०
गौतम iii
ग्लानभैषज्य २२, २३
घोषलीग्राम ३०
चक्कवत्तिसीहनाद सुत्त iv
चक्रवर्त्ती ४, ६, १४
चतुरङ्गबल ६
चतुर्द्वीप ६
चतुर्महानिधि v, vi, ६, ११
चतुर्वेद ११
जम्बुद्वीप iv, vi, ४
जातक ii
जिन २७, २९
जिनमित्र ii
तथागत अजित प्रलोकनाथ ii
,, नन्दीप्रभ ii
,, विकुर्वाणराज ii
तुषित ११
त्रिदशाधिप २५
त्रैधातुक १२
दिव्यावदान v
दीघ-निकाय ii
दीपवंस v
देवराज १२, १४
द्वात्रिंशद्वरलक्षण १३, १४
धर्म १६, २३, ३०
धर्मकाय २६
धर्मचक्र iv २४
धर्मरत्न ii
धर्मसंग्रह iii
धर्मसेनापति ३
नाग vii, १३, १८
नागवृक्ष ( नागपुष्प ) vii, १८
निर्घण्ट ११
निर्वाण १६, २६, ३०
पदव्याकरण ११
पन्नग १३
पाण्डुक v, vi, ११
पिङ्गल v, vi, ११
पुण्यकीर्ति ( भिक्षु ) ३०
प्रत्येकबुद्ध ii
प्रव्रज्या १६, १७, १८, १९, २०
प्रातिहारिक पक्ष २३

| | |
|---|---|
| प्रातिहार्य | २४ |
| बुद्ध | ii, iii, ३, १४, २३, ३० |
| बुद्धघोष | ii |
| बुद्धवचन | ii |
| बुद्धवंस | v |
| बोधि ( सम्बोधि ) | १८ |
| बोधिवृक्ष | १८ |
| ब्रह्मचर्य | २८ |
| ब्रह्मा | २५, २७ |
| ब्रह्मावती | vi, ११ |
| भद्रमायाकार व्याकरण | ii |
| मज्झिम निकाय | ii |
| मन्त्र | ११, १४, १५ |
| महायान | ii |
| महावस्तु | v |
| महावंस | v |
| महाव्युत्पत्ति | iii, iv |
| मान्दारक पुष्प | २५ |
| मार | २७ |
| मित्रायू | iii |
| मिथिला | v, vi, ११ |
| मिलिन्दपञ्ह | v |
| मैत्रेय | i—vii, ३, ११, १२, १४, १६, ७, १८, २०, २१, २७, २८, २६, ३० |
| मैत्रेय लोक | ii |
| मैत्रेय व्याकरण | i, ii, १३ |
| मैत्रेय समिति | ii |
| मैत्रेय समिति नाटक | ii |
| यक्ष | २८ |
| यूप | vii, १६ |
| राक्षस | २८ |
| रोगक्षय | ६ |
| लोकधातु | ii |
| लोकनाथ | २१, २६, २७ |
| वाराणसी | v, vi, ११ |
| विशाखा | vii, २० |
| वेद | ११ |
| वैभाषिक आर्यचन्द्र | ii |
| व्याकरण ( वेय्याकरण ) | ii, ११ |
| व्याकरण परिवर्त | iii |
| शङ्ख | v, vi, vii, ६, १०, ११, १६, १६, २० |
| शचीपति | १२, १४, २७ |
| शतक | i |
| शरण | २२ |
| शाक्यमुनि | iv, २२, २६ |
| शाक्यसिंह | २१, २३ |
| शारिपुत्र | vi, ३ |
| शासन | ३, १६, २०, २१, २३ |
| शास्ता | ३, २१, २८, २६, ३० |
| शिक्षापद | २३ |
| शील | २३ |
| श्रावक | ii, २४ |
| श्रीमहादेवी व्याकरण | ii |
| सन्निपात | vii, १६, २१, २४ |
| समाधिराज सूत्र | iii |
| सम्बोधि ( बोधि ) | १८ |
| संघ | २२, २३, ३० |
| सद्धर्म | १६, २१, २७, २६, ३० |
| सद्धर्मपुण्डरीक सूत्र | iii |
| सिद्धार्थ | iii, vi |
| सुधन | vii, २० |
| सुब्रह्मन् | vi, vii, ११, १४ |
| स्तूप | २२ |
| स्थविरवाद | ii |
| हारीति महायक्षिणी | ३० |